# Shri Mangala Ashtakam

# श्रीमङ्गलाष्टकम्

## Document Information

Text title : Shri Mangala Ashtakam 08 31

File name : mangalAShTakam.itx

Category : devii, devI, mangala, aShTaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-31

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# श्रीमङ्गलाष्टकम्

ब्रह्मा विष्णुर्गिरीशः सुरपतिरनलः प्रेतराड्यातुनाथः
तोयाधीशश्च वायुर्धनदगुहगणेशार्कचन्द्राश्च रुद्राः ।
विश्वादित्याश्विसाध्या वसुपितृमरुतः सिद्धविद्याध्रयक्षः
गन्धर्वाः किन्नराश्चाखिलगगनचराः मङ्गलं मे दिशन्तु ॥ १॥

वाणी लक्ष्मीर्धरित्री हिमगिरितनया चण्डिका भद्रकाली
ब्राह्म्याद्या मातृसङ्घा आदतिदितिसतीत्यादयो दक्षपुत्र्यः ।
सावित्री जह्नुकन्या दिनकरतनयारुन्धती देवपत्न्यः
पौलोम्याद्यास्तथान्याः खचरयुवतयो मङ्गलं मे दिशन्तु ॥ २॥

मत्स्यः कूर्मो वराहो नृहरिरथ वटुर्भार्गवो रामचन्द्रः
सीरी कृष्णश्च कल्की स कपिलनरनारायणोऽत्रेयवैन्यः ।
अन्ये नानावतारा नरकविजयिनश्चक्रमुख्यायुधानि
तत्पत्न्यः तत्सुताश्चाप्यखिलहरिकला मङ्गलं मे दिशन्तु ॥ ३॥

विश्वामित्रो वसिष्ठः कलाभव उचथ्योऽङ्गिराः काश्यपश्च
व्यासः कण्वो मरीचिः क्रतुभृगुपुलहो गौतमोऽत्रिः पुलस्त्यः ।
अन्ये सर्वे मुनोन्द्राः कुजबुधगुरुशुक्रार्कजाद्या ग्रहा ये
नक्षत्राणि प्रदेशाः फणिगणमनवो मङ्गलं मे दिशन्तु ॥ ४॥

ताक्ष्योऽनन्तो हनूमान् बलिरपि सनकाद्याः शुको नारदश्च-
प्रह्लादः पाण्डुपुत्रो नृगनलनहुषा विष्णुरातोऽम्बरीषः ।
भीष्मोऽक्रूरोद्धवोशीनरभरतहरिश्चन्द्ररुक्माङ्गदाद्याः
अन्ये सर्वे नरेन्द्राः रविशशिकुलजाः मङ्गलं मे दिशन्तु ॥ ५॥

आकूत्याद्याश्च तिस्रः सकलमुनिकलत्राणि दारा मनूनां
सीता कुन्ती च पाञ्चाल्यथ नलदयिता रुक्मिणी सत्यभामा ।
देवक्याद्याश्च सर्वा यदुकुलवनिता राजभार्यास्तथान्याः
गोप्यश्चारित्रयुक्ताः सकलयुक्तयो मङ्गलं ये दिशन्तु ॥ ६॥

विप्रा गावश्च वेदाः स्मृतिरपि तुलसी पुण्यतीर्थानि विद्या
नानाशास्त्रेतिहासान्यपि सकलपुराणानि वर्णाश्रमाश्च ।
साङ्ख्यज्ञानञ्च योगा अपि यमनियमौ सर्वकर्माणि कालाः
सर्वे धर्माश्च सत्याद्यवयवसहिता मङ्गलं मे दिशन्तु ॥ ७॥

लोका जीवाः समुद्राः क्षितिधरपतयो मेरुकैलासमुख्याः
कावेरीनर्मदाद्याः शुभजलसहिताः स्वर्द्रुमा दिग्गजेन्द्राः ।
मेघा ज्योतींषि नानानरपशुमृगपक्ष्यादयः प्राणिनोऽन्ये
सर्वौषध्यश्च वृक्षाः सकलतृणलता मङ्गलं मे दिशन्तु ॥ ८॥

भक्त्या संयुक्तचित्ताः प्रतिदिवसमिमान्मङ्गलस्तोत्रमुख्या-
नष्टौ श्लोकान् प्रभाते दिवसपरिणतौ ये च मर्त्याः पठन्ति ।
ते नित्यं पूर्णकामा इह भुवि सुखिनश्चार्थवन्तोऽपि भूत्वा
निर्मुक्ताः सर्वपापैर्वयसि च चरमे विष्णुलोकं प्रयान्ति ॥ ९॥

इति श्रीमङ्गलाष्टकं सम्पूर्णम् ।

Proofread by Rajesh Thyagarajan

*Shri Mangala Ashtakam*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*